# parameshvarastotram

# પરમેશ્વરસ્તોત્રમ્

## Document Information

Text title : parameshvarastotram

File name : parameshvarastotram.itx

Category : stotra, shiva, vishhnu, deities_misc, vishnu, aShTaka

Location : doc_deities_misc

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description/comments : In some stanzas it addresses Shiva and in others Vishnu but what it aims is to address God who is beyond such limited descriptions.

Latest update : August 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2023

*sanskritdocuments.org*

# પરમેશ્વરસ્તોત્રમ્

જગદીશ સુધીશ ભવેશ વિભો
    પરમેશ પરાત્પર પૂત પિતઃ ।
પ્રણતં પતિતં હતબુદ્ધિબલં
    જનતારણ તારય તાપિતકમ્ ॥ ૧॥

ગુણહીનસુદીનમલીનમતિં
    ત્વયિ પાતરિ દાતરિ ચાપરતિમ્ ।
તમસા રજસાવૃતવૃત્તિમિમં
    જનતારણ તારય તાપિતકમ્ ॥ ૨॥

મમ જીવનમીનમિમં પતિતં
    મરુઘોરભુવીહ સુવીહમહો ।
કરુણાબ્ધિચલોર્મિજલાનયનં
    જનતારણ તારય તાપિતકમ્ ॥ ૩॥

ભવવારણ કારણ કર્મતતૌ
    ભવસિન્ધુજલે શિવ મગ્નમતઃ ।
કરુણાઞ્ચ સમર્પ્ય તરિં ત્વરિતં
    જનતારણ તારય તાપિતકમ્ ॥ ૪॥

અતિનાશ્ય જનુર્મમ પુણ્યરુચે
    દુરિતૌઘભરૈઃ પરિપૂર્ણભુવઃ ।
સુજઘણ્યમગણ્યમપુણ્યરુચિં
    જનતારણ તારય તાપિતકમ્ ॥ ૫॥

ભવકારક નારકહારક હે
    ભવતારક પાતકદારક હે ।
હર શઙ્કર કિઙ્કરકર્મચયં
    જનતારણ તારય તાપિતકમ્ ॥ ૬॥

તૃષિતશ્ચરમસ્મિ સુધાં હિત મે-
    ઽચ્યુત ચિન્મય દેહિ વદાન્યવર ।
અતિમોહવશેન વિનષ્ટકૃતં
    જનતારણ તારય તાપિતકમ્ ॥ ૭॥

પ્રણમામિ નમામિ નમામિ ભવં
    ભવજન્મકૃતિપ્રણિષૂદનકમ્ ।
ગુણહીનમનન્તમિતં શરણં
    જનતારણ તારય તાપિતકમ્ ॥ ૮॥

ઇતિ પરમેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

---

*parameshvarastotram*

pdf was typeset on December 18, 2023

Please send corrections to *sanskrit@cheerful.com*